# अत्रि स्तुति

नमामि भक्त वत्सलं । कृपालु शील कोमलं ।
भजामि ते पदांबुजं । अकामिनां स्वधामदं ।।
निकाम श्याम सुंदरं । भवाम्बुनाथ मंदरं ।
प्रफुल्ल कंज लोचनं । मदादि दोष मोचनं ।।
प्रलंब बाहु विक्रमं । प्रभोऽप्रमेय वैभवं ।
निषंग चाप सायकं । धरं त्रिलोक नायकं ।।
दिनेश वंश मंडनं । महेश चाप खंडनं ।
मुनींद्र संत रंजनं । सुरारि वृंद भंजनं ।।
मनोज वैरि वंदितं । अजादि देव सेवितं ।
विशुद्ध बोध विग्रहं । समस्त दूषणापहं ।।
नमामि इंदिरा पतिं । सुखाकरं सतां गतिं ।
भजे सशक्ति सानुजं । शची पति प्रियानुजं ।।
त्वदंघ्रि मूल ये नराः । भजंति हीन मत्सराः ।
पतंति नो भवार्णवे । वितर्क वीचि संकुले ।।
विविक्त वासिनः सदा । भजंति मुक्तये मुदा ।।
निरस्य इंद्रियादिकं । प्रयांति ते गतिं स्वकं ।।
तमेकमद्भुतं प्रभुं । निरीहमीश्वरं विभुं ।।
जगद्गुरुं च शाश्वतं । तुरीयमेव केवलं ।।
भजामि भाव वल्लभं । कुयोगिनां सुदुर्लभं ।
स्वभक्त कल्प पादपं । समं सुसेव्यमन्वहं ।।

अनूप रूप भूपतिं । नतोऽहमुर्विजा पतिं ।

प्रसीद मे नमामि ते । पदाब्ज भक्ति देहि मे ।।

पठंति ये स्तवं इदं । नरादरेण ते पदं ।

ब्रजंति नात्र संशयं । त्वदीय भक्ति संयुताः ।।

बिनती करि मुनि नाइ सिरु कह कर जोरि बहोरि ।

चरन सरोरुह नाथ जनि कबहुँ तजै मति मोरि ।।